# 4. मम परिवारः

PDBYRV



एकस्मिन् ग्रामे जगत्पालो नाम एकः सज्जनो वसतिस्म। तस्य परिवारः सीमित-परिवारः अस्ति । तस्य पत्नी कला अस्ति । जगत्पालः सप्तत्रिंशद्वर्षीयः कला द्वात्रिंशद्वर्षीया च स्तः । जगत्पालस्य हृदयमतीवोदारं, कलायाः स्वभावश्चातीव मधुरो विद्यते । तौ दम्पती सुखेन निवसतः।

तयोः द्वे सन्तती स्तः । एकस्तनयः एका तनया च। तनयस्य नाम सुरेशः तनयाश्च नाम प्रतिभा अस्ति । सुरेशः एकादशवर्षीयः प्रतिभा सप्तवर्षीया च । सुरेशः सप्तम्-कक्षायां पठति प्रतिभा तृतीय-कक्षायां च ।

आम्रनिम्बकादिवृक्षैः आच्छादितं जगतपालस्य गृहमत्यन्तं रमणीयं वर्तते । जगत्पालः एकः योग्यः कुशल-कृषकः । सः सर्वदा कृषि कर्मणि व्यापृतः स्वकर्त्तव्यं पालयति । सः परिश्रमं कृत्वा स्वक्षेत्रे पर्याप्तमन्नं शाकं फलं च उत्पादयति । तस्य गृहे एका श्वेत-वर्णा धेनुः वर्तते । सा दुग्धं ददाति ।

सुरेशः प्रतिभा च स्वास्थ्यप्रदं पुष्टिप्रदं च भोजनं कुरुतः । तयोः आहारे शाकस्य फलस्य चाधिक्यं वर्तते । तौ भ्रातृभगिन्यौ यथेच्छं दुग्धं पिबतः । स्वच्छानि वस्त्राणि परिधाय प्रसन्नौ स्वस्थौ तौ मातरं पितरं च प्रणम्य पठनाय स्व विद्यालयं प्रति गच्छतः ।

कला एका स्वस्था आदर्शभूता च गृहिणी अस्ति । पति जगत्पालोऽपि स्वपत्नीं कलां बहु मन्यते । अनेन कारणेन परस्परस्नेह-सौहार्द्रबध्दः अयं लघुपरिवारः एकः आदर्शपरिवारः । आहारस्य वस्त्रस्य गृहस्य च व्यवस्था लघुपरिवारे एव समुचितरूपेण भवति । लघुपरिवारेणैव समाजस्य राष्ट्रस्य च कल्याणं भवितुम् अर्हति ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| एकस्मिन् ग्रामे | - एक गांव में । | दम्पती | - पति-पत्नी । |
| वसति | - रहता है । | निम्ब | - नीम का वृक्ष । |
| जगत्पालस्य | - जगतपाल का । | तनयः | - पुत्र |
| कक्षायाम् | - कक्षा में । | तनया | - पुत्री । |
| आच्छादितम् | - ढका हुआ । | शाकम् | - सब्जी । |
| कर्मणि | - कर्म में । | प्रणम्य | - प्रणाम करके । |
| व्यापृतः | - लगा हुआ, तत्पर । | अनेन-कारणेन | - इस कारण से । |
| तस्य गृहे | - उसके घर में । | अर्हति | - योग्य है । |

## अभ्यासः

**1. निम्नांकित प्रश्नों के उत्तर संस्कृत भाषा में दीजिए ।**

क. जगत्पालस्य हृदयं कीदृशम् अस्ति ?

ख. प्रतिभा कस्यां कक्षायां पठति ?

ग. कीदृशः परिवारः सुखीपरिवारः ?

घ. कला कीदृशी गृहिणी आसीत् ?

**2. खाली स्थान पूर्ण कीजिए -**

क. तयोः आहारे ............ चाधिक्यं वर्तते ।

ख. जगत्पालस्य गृहम् अत्यन्तम् ............. वर्तते ।

**3. संस्कृत में अनुवाद कीजिए ।**

क. जगत्पाल का हृदय उदार है ।

ख. उसकी पत्नी का नाम क्या है ?

ग. उसके पुत्र का नाम सुरेश है ।

घ. सुरेश किस कक्षा में पढ़ता है ?

ङ. यह छोटा परिवार है ।

**4. निम्न का संधि विच्छेद कीजिए ।**

क. तनयाश्च

ख. जगत्पालोऽपि

ग. एकस्तनयः

घ. परिवारेणैव